Homas
the spiritual way to success
K. Krishna Prasad Bhat
Website: http://homas.in
Email: homasonline@gmail.com
Mobil: 8000858858 /9940406777



अथ यक्षप्रवरकुबेरमन्त्रप्रसङ्गात् गन्धर्वप्रवरचित्ररोनादिमन्त्रोपि (मन्त्रा अपि) मन्त्रदेवताप्रकाशिकोक्तप्रकारेणात्र योग्यतावशाल्लिख्यते (न्ते) ॥

ब्रह्मा ऋषिः । विराट् छन्दः । गन्धर्वो देवता । क्लीं हृत् । राजन् शिरः । गन्धर्व शिखा । गगनाश्रय कवचम् । चित्रसेन नेत्रम् । कन्यां प्रयच्छ मे स्वाहा अस्त्रम् । ध्यानम् —

द्वादशस्त्रीपरिवृतं सुरसङ्घपुरस्सरम् ।
कामदं चित्रसेनाख्यं कन्यादानसुदीक्षितम् ॥

क्लीं राजन् गन्धर्व गगनाश्रय चित्रसेन कन्यां प्रयच्छ मे स्वाहा ॥ इति मन्त्रः । षण्मासं नित्यमष्टोत्तरशतं जपेत् । इष्टां कन्यां लभते ॥

लाजैः पुष्पैर्घृतैर्होमात् नित्यं द्वाविंशकं परम् ।
द्वादशं तर्पणं नित्यं विधिरेष भवेत्सदा ॥

तस्मै सर्वप्रयत्नेन कन्यां दद्यात्सदावराम् ।
पुष्पाणि यानि कानिचित् काम्यकुसुमानीति ।

प्रयोगान्तरम् — वचापिप्पलिनिर्गुण्डीश्चूर्णं कृत्वा शुभे दिने ।
मन्त्रं जप्त्वाष्टशतकं भक्षयेद्यदि मानवः ॥
गानविद्यां समाप्नोति शीघ्रमेव विशेषतः ।

वचा–वेखण्ड । पिप्पली–पिंपली । निर्गुण्डी–निर्गुण्डी நொச்சில்.

प्रयोगान्तरम् — मन्त्रमष्टोत्तरशतं जप्त्वा दशदिनं सुधीः ।
घृतं पिबेत्तु मन्त्रान्ते रूपमेव भवेत्क्षणात् ॥

वन्दे गन्धर्वराजानं मणिमालाविराजितम् ।
सुधर्माधिष्ठितं नित्यं शुद्धचामीकरप्रभम् ॥

मन्दारपुष्पसुमनोहरकेशपाशं
वामभ्रुवां ललितविग्रहमप्रमेयम् ।
वन्दे च नित्यमभिराममनङ्गतुल्यं
आलोलकुन्तळमथाब्जदळायताक्षत् ॥

प्रयोगान्तरम्—

गुरोर्वारे तथा विद्वान् सौम्ये वाथ विशेषतः ।
घृतमिश्रैः प्रसूनैस्तु जुहुयाद्वै शतत्रयम् ॥

यथावर्णं प्रसूनं वै तद्वर्णं वस्त्रमाप्नुयात् ।
सोमवारदिने पूर्वं पूजां कृत्वा विनायके ॥

आसीनोदङ्मुखो मन्त्री मन्त्रमष्टशतं जपेत् ।
जपान्ते क्षीरहोमी स्यात्तदर्धं वै पुनः पुनः ॥

तच्छेषं प्राशयेद्विद्वान् वाङ्नदीवेगवान् भवेत् ।
वटवृक्षस्य मूलेऽस्मिन्नासीनः प्राङ्मुखः शुचिः ॥

सायं प्रातर्जपेन्मन्त्री मन्त्रमष्टशतं क्रमात् ।
सप्ताहं वाथ पञ्चाहं यथाविधि समाहितः ॥

जपान्ते तर्पणं होमं सतिलैर्घृतसंयुतम् ।
तच्छेषं प्राशयेद्विद्वान् वाङ्नदीवेगवान् भवेत् ॥

भानुपुष्पं समादाय तीक्ष्णतैलेन मिश्रितम् ।
द्विरात्रं होमयेन्मन्त्री मन्त्रमष्टशतं जपेत् ॥

उच्चाटनमिदं साक्षादरेस्तस्य न संशयः ।

भानुपुष्पं – रुचीचेंफूल எருக்கம்பூ तीक्ष्णतैलं–मोहरयाचेंतेल
கடுகு எண்ணெய்